Vishnuna Parashuramaya Proktam Kavacham

# विष्णुना परशुरामाय प्रोक्तं कवचम्

## Document Information

Text title : Vishnuna Parashuramaya Proktam Kavacham

File name : viShNunAparashurAmAyaproktaMkavacham.itx

Category : vishhnu, vishnu, lakShmInArAyaNIyasaMhitA, kavacha

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 1 | adhyAya 458/62-75||

Latest update : January 13, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 13, 2026

*sanskritdocuments.org*

# विष्णुना परशुरामाय प्रोक्तं कवचम्

विष्णुः कवचमादाय रामं प्रति समाययौ ॥ ६२॥

ददौ समन्त्रं परशुरामाय तच्छृणु प्रिये ।
"ॐ श्रीकमलवासिन्यै स्वाहा" मन्त्रं ददौ ततः ॥ ६३॥

प्रजापतिः ऋषिर्यस्य छन्दश्च बृहती तथा ।
देवी पद्मालया यस्य चतुर्वर्गे नियोजनम् ॥ ६४॥

ॐ श्रीकमलवासिन्यै स्वाहा मे पातु मस्तकम् ।
ॐ श्री कपालं मे पातु लोचने श्रींश्रियै नमः ॥ ६५॥

ओ श्रींश्रियै स्वाहेति वै कर्णयुग्मं सदाऽवतु ।
ॐ श्रीक्लीं महालक्ष्म्यै स्वाहा मे पातु नासिकाम् ॥ ६६॥

ॐ श्रीं पद्मालयायै च स्वाहा दन्तान् सदाऽवतु ।
औश्रीं कृष्णप्रियायै च दन्तरन्ध्रान् सदाऽवतु ॥ ६७॥

ॐ श्रीनारायणेशायै मम कण्ठं सदाऽवतु ।
ॐ श्रीं केशवकान्तायै मम स्कन्धं सदाऽवतु ॥ ६८॥

ॐ श्रीं पद्मनिवासिन्यै स्वाहा नाभिं सदाऽवतु ।
ॐ ह्रीं श्रीं संसारमात्रे मम वक्षः सदाऽवतु ॥ ६९॥

ॐ श्रीम्मों कृष्णकान्तायै स्वाहा पृष्ठं सदाऽवतु ।
ॐ ह्रींश्रीं श्रियै स्वाहा च मम हस्तौ सदाऽवतु ॥ ७०॥

ॐ श्रीनिवासकान्तायै मम पादौ सदाऽवतु ।
ॐ श्रींह्रीक्लीं श्रियै स्वाहा सर्वाङ्गं मे सदाऽवतु ॥ ७१॥

प्राच्यां पातु महालक्ष्मीराग्नेय्यां कमलालया ।
पद्मा मां दक्षिणे पातु नैर्ऋत्यां श्रीहरिप्रिया ॥ ७२॥

पद्मालया पश्चिमे मां वायव्यां पातु मां स्वयम् ।

उत्तरे कमला पातु चैशान्यां सिन्धुकन्यका ॥ ७३॥

नारायणी च पातूर्ध्वमधो विष्णुप्रियाऽवतु ।
सन्ततं सर्वतः पातु विष्णुप्राणाधिका मम ॥ ७४॥

इति सर्वैश्वर्यप्रदं वर्म बाहौ सुधारय ।
देवेन्द्रैश्चासुरेन्द्रैश्चाऽवध्यो भवसि निश्चितम् ॥ ७५॥

इत्युक्त्वा कवचं दत्वा ययौ वैकुण्ठमच्युतः ।

इति श्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने ४५८-अध्यायान्तर्गतं विष्णुना परशुरामाय प्रोक्तं कवचम् ।

लक्ष्मीनारायणीयसंहिता । खण्ड १। अध्याय ४५८/६२-७५॥

lakShmInArAyaNIyasaMhitA . khaNDa 1. adhyAya 458/62-75..

Proofread by PSA Easwaran

*Vishnuna Parashuramaya Proktam Kavacham*

pdf was typeset on January 13, 2026

Please send corrections to *sanskrit@cheerful.com*